# रामकृष्णमिशन्-विद्यामन्दिरम्

**वेलुडमठस्थम्, हाओडामण्डलस्थम्**

## संस्कृतविभागः

**स्नातकोत्तरकक्षाप्रवेशपरीक्षाप्रश्नपत्रम् — २०२३**

**पूर्णाङ्काः – ४०** **समयः- सार्धघण्टात्मकः**

**(सर्वमुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्।)**

१) **यथाकामं कमप्येकं विषयं वलम्ब्य न्यूनतया दशभिर्वाक्यैः लघुबन्धो विरचनीयः।** १०

क. विद्युत्तन्त्री (Electric wire) ख. हसनम् ग. वलाहकः

२) **अधोलिखितस्यानुच्छेदस्य संस्कृतभाषया अनुवादः कार्यः।** १०

Once in a hot day, a thirsty crow flew all over the fields looking for water. For a long time, he could not find any. He felt very weak and almost lost all hope. Suddenly, he saw a water jug below the tree. He flew straight down to see if there was any water inside. Yes, he could see some water inside the jug. The crow tried to push his head into the jug. Sadly, he found that the neck of the jug was too narrow. Then he tried to push the jug to tilt for the water to flow out. But the jug was too heavy. The crow thought hard for a while. Then, looking around it, he saw some pebbles. He suddenly had a good idea. He started picking up the pebbles one by one, dropping each into the jug. As more and more pebbles filled the jug, the water level kept rising. Soon it was high enough for the crow to drink. His plan had worked!

३) **अधोधृतानां प्रश्नानामुत्तरं संक्षेपेण संस्कृतभाषया लिखत।** १०x२=२०

क. अधोधृतस्य पद्यस्य छन्दः गणविभागपुरःसरं निर्णेयम्-

साक्षात्प्रियामुपगतामपहाय पूर्वं
चित्रार्पितां पुनरिमां बहु मन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान्मृगतृष्णिकायाम् ॥

ख. उपर्युक्ते पद्ये अलङ्कारः सलक्षणं निर्णेयः।

ग. “स जनास इन्द्रः”- इत्यत्र रेखाङ्कितपदस्य लौकिकं रूपं किम्? किमत्रास्ति वैलक्षण्यम्?

घ. “पर्वतः वह्निमान्”- इत्यनुमितौ किमस्ति विशेष्यं किं च विशेषणम्?

ङ. न्यायदर्शनमते यथार्थानुभवस्य कति भेदाः सन्ति? तेषां करणानि कानि?

च. “अयं गौः अश्वत्वात्।” इत्यत्र सयुक्ति हेत्वाभासः निर्णेयः।

छ. उपर्युक्तस्य साक्षात्प्रियामित्यादिपद्यस्य पदानामन्वयं प्रदर्श्य तत् पद्यं वाच्यान्तरेण लेख्यम्।

ज. स्रोतोवहाम्- इत्यत्र रेखाङ्कितपदे समासः निर्णेयः।

झ. मन्यमानः – इत्यत्र व्युत्पत्तिः प्रदर्शनीया।

ञ. मम मने यदा दुःखः उद्यन्ति तदा भगवानस्य चिन्ता करामि- इति वाक्यं संशोध्य लेख्यम्।

———— × ————